International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2023; 9(5): 82-83
© 2023 IJSR
www.anantaajournal.com
Received: 13-07-2023
Accepted: 18-08-2023

**Maheshwari Hullur**
Research Scholar, Vidyachala Girl's Hostal, NSU, Tirupati, Andhra Pradesh, India

**CorrespondingAuthor:**
**Maheshwari Hullur**
Research Scholar, Vidyachala Girl's Hostal, NSU, Tirupati, Andhra Pradesh, India

# सूतसंहितायाम् अद्वैतमतानुसारं सत्ताविचारः

**Maheshwari Hullur**

**सारांश**
सर्वव्यापि भारतीयदर्शनानि नित्यनिरतिशयानन्दमोक्षमुद्दिश्य प्रवृत्तानि। तेषु न सर्वेषां दर्शनानां साक्षात्तदर्थप्रतिपादकत्वं, किन्तु परम्परया इत्यतः साक्षादात्मतत्त्वप्रतिपादनात् वेदान्तदर्शनम् इतरदर्शनापेक्षया मूर्धन्यं स्थानं भजते। वेदान्तदर्शनेऽस्मिन् प्रस्थानत्रयं सुप्रसिद्धं यथा – श्रुतिप्रस्थानम्, स्मृतिप्रस्थानम्, सूत्रप्रस्थानं चेति। तत्र श्रुतिप्रस्थानम् – उपनिषदः, स्मृतिप्रस्थानम् – भगवद्गीता, सूत्रप्रस्थानम् – ब्रह्मसूत्रम्। एतेषु त्रिष्वपि जगदुत्पत्तिः, तत्कारणम्, अविद्या, उपाधिभेदेन जीवेश्वरभेदः, मोक्षप्राप्त्युपायाः मार्गाश्चेत्येवमनेके विषयाः प्रतिपादिताः। अज्ञानवशात् आत्मज्ञानं किमित्यवगमने क्लेशोऽनुभूयते इत्यत्र तु नास्ति सन्देहः। तन्निवारणाय मिथ्याभूतं वस्तु किं, किञ्च नित्यं वस्तु इत्यादि ज्ञानमपेक्ष्यते। ततश्च मिथ्याभूतानां वस्तूनां जडत्वात्, बाध्यमानत्वाच्च, शुद्धे नित्ये पारमार्थिकसद्वस्तुनि चिन्तनं प्रवर्तते। एवं सद्विषयकचिन्तनेन मनश्शुद्धिः ततः आत्मज्ञानेऽधिकारः भवति, निरन्तराभ्यासेन स्वकर्मानुगुणं भवसागरान्मुक्तो भवति।

**कूटशब्द :** मिथ्या, मिथ्यात्वं, सत्ता, व्यावहारिकसत्ता, प्रातिभासिकसत्ता, पारमार्थिकसत्ता।

**प्रस्तावना**
ब्रह्म सत्यं जगन्मिथ्या [1] अर्थात् ब्रह्मैव केवलं वस्तु सत्यं, तद्भिन्नं सर्वं मिथ्या इत्यर्थः। ब्रह्मणश्च सगुणब्रह्म–निर्गुणब्रह्म इति विभागश्रवणात् कीदृशं ब्रह्म सत्यमिति शङ्का उदेति। तत्रोच्यते निर्गुणं निर्विशेषं ब्रह्ममात्रं परं सत्यं, सगुणं सविशेषं तु अविद्यायाः उपाधित्वात् औपाधिकम्। इदं सगुणब्रह्मैव जगतः कर्ता ईश्वर इति व्यवह्रियते। स च ईश्वरः अविद्योपहितत्वादेव न पारमार्थिकः, किन्तु मिथ्या। परन्तु ज्ञानेन अविद्यानाशे, उपाध्यभावे ईश्वरः ब्रह्मणः अभिन्न एव। अतः समस्तोऽयं प्रपञ्चः ब्रह्मैव भवति, तत्सृष्ट्वा तदेवानुप्राविशत् [2] इति श्रुतेः। यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति [3] इति श्रुत्या इदमवगम्यते यत् यस्मादयं प्रपञ्चः उत्पन्नः, येन संरक्ष्यमाणः वर्तते, यत्र च लीयते तद्ब्रह्म इति। एवं सर्वकारणीभूतब्रह्मणा उत्पन्नस्यास्य प्रपञ्चस्य मिथ्यात्वमिति कथमुपपाद्यते? कथञ्च जीवब्रह्मणोरभेदः बोध्यते?

प्रपञ्चो वा प्रपञ्चे विद्यमानपदार्थाः सन् घटः, सन् पटः, इत्यादिप्रतीत्या यद्यपि सत्वेन प्रतीयन्ते, परन्तु तेषां व्यावहारिकसत्यत्वमङ्गीकृतं, न तु पारमार्थिकसत्यत्वम्। सन् घटः इत्यादौ श्रूयमाणसत्त्वं कीदृशं, कति विधमित्यादि प्रश्ने उच्यते दृ सत्त्वं नाम त्रिकालाबाध्यत्वम् अथवा प्रमाणसिद्धत्वम् [4] इति। कालत्रयेऽपि यस्य बाधः न स्यात्, ज्ञानान्तरेणापि न बाध्येत तादृशं सत्त्वं पारमार्थिकमित्युच्यते। इदं सत्त्वं वेदान्ते त्रिधा उपस्थापितम् – व्यावहारिकसत्त्वं, प्रातिभासिकसत्त्वं, पारमार्थिकसत्त्वं चेति।

पुरतः दृश्यमाने शुक्तौ इदं रजतमिति ज्ञानमुत्पद्यते। अत्र चाकचक्यादिकं दृष्ट्वा आपणस्थरजतस्य स्मरणात् इदं रजतमिति ज्ञानमुत्पन्नम्। सम्यक् परिशीलिते सति नेदं रजतं किन्तु शुक्तिरिति ज्ञानेन पूर्वमुत्पन्नं रजतज्ञानं बाध्यते। अतः प्रतीतिसमये एव वर्तते, परन्तु ज्ञानान्तरेण उत लौकिकप्रमाणेन वा यद्बाध्यते तस्य प्रातिभासिकसत्त्वम्। प्रतिभासकालमात्रे विद्यमानाः प्रातिभासिकाः। अत्र काचिच्छङ्का यत् नेदं रजतमिति ज्ञानेन रजतस्य बाध्यमानत्वात् आपणस्थरजतोऽपि किं बाध्यते? नैव बाध्यते। यतोहि यद्वस्तु यस्मिन्नुपाधौ प्रतीतं तद्वस्तु तत्रैव बाध्यते नान्यत्र इति नियमः। यथा जीवः स्वप्ने बहुविधकार्याणि करोति – अथ रथान् रथयोगान् पथः सृजते [5], बहिष्कुलायादमृतश्चरित्वा [6] इत्यादि श्रुतिः। परं यदा जीवः

---

[1] वि.चू – २०
[2] तै.उ – २.६.१
[3] तै.उ – ३.१.१
[4] अद्वैतसिद्धिः पञ्चममिथ्यात्वम्
[5] बृ.उ – ४.३.१०
[6] बृ.उ – ४.३.१२

जाग्रतो भवति तदानीं तु न तत्र रथा न रथयोगा पन्थानो भवन्ति[7] तथा च संवृतत्वात् देहात् बहिर्गत्वा देशान्तरितं गतेन काशी विश्वनाथः दृष्टश्चेत् उत्थानं काश्यां नैव सम्भवति। तस्मात् यत्र स्वप्ने दृष्टाः पदार्थाः स्वप्ने एव बाध्यन्ते, अतः स्वप्नोऽपि प्रातिभासिक एव।

वैदिकेन प्रमाणेन यद्बाध्यं वैदिकेऽवधौ।
तद्व्यावहारिकं सत्त्वं बाध्यं मात्रा सहैव तत्।।[8]

नामरूपाभ्यां व्याकृतस्यास्य जगतः व्यावहारिकसत्त्वं सर्वैरभिमतमेव। सन् घटः, सन् पटः, पुस्तकं सत् इत्यादौ यः परस्परभेदः दृश्यते सः न भ्रान्तिसिद्धः, नामरूपाभ्यां तयोः भेददर्शनात्। इदमेव सूतसंहितायां प्रतीत्या सत्यरूपैव व्यवहारे मुनीश्वराः[9] इति निरूपितम्।
तत्र यदनुगतं सत्त्वं तस्य च जातित्वमङ्गीकर्तव्यमिति नैयायिकाः। कम्बुग्रीवाद्याकारदर्शनेन अयं घटः अस्ति इति ज्ञानमुत्पद्यते, न तु बाध्यते। अयं पटः इति ज्ञानान्तरेण घटज्ञानं न बाध्यते, अतोऽस्य व्यावहारिकसत्ता। किन्तु इदं घटपटादिज्ञानं तत्त्वमस्यादि वैदिकज्ञानेन बाध्यते। तदा घटपटादि भेदव्यवहार एव न भवति, तस्मात् ब्रह्मभिन्नं सर्वमखिलं मिथ्या। प्रमातुरपि बाध्यमानत्वात् प्रमातृत्वमपि न प्रतीयते। स्वाप्नपदार्थवत् व्यवहारदशायां विद्यमानाः घटपटादिपदार्थाः मिथ्याभूताः।
जीवेश्वरयोः यः भेदः कल्पितः सः औपाधिक एव। उपाधिवशादेव जीवे अल्पज्ञः, कर्ता, भोक्ता इत्यादिव्यवहाराः, इश्वरे च सर्वज्ञः, सर्वशक्तः इत्यादिव्यवहाराः सम्भवन्ति। उपाधिनाशे सति कार्यभूतं तत्कारणे लीयते। यथा मृदा निर्मितः घटः, मुद्गरपातादिना घटे नष्टे, तत्कारणे मृदि लीयते, वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्[10] इति श्रुतेः। एवं ब्रह्मणा उत्पन्नमिदं जगत् तत्कारणे ब्रह्मण्येव लीयते। यदुत्पन्नं, यस्य च उपाधिवशात् भेदः कल्पितः सः केवलं व्यवहारदशायामेव प्रतीयते। अतः ब्रह्ममात्रं सत्यम्, अन्यत्सर्वं मिथ्या। तदुक्तं गौडपादाचार्यैः मायामात्रमिदं द्वैतमद्वैतं परमार्थतः[11] इति।

## संदर्भ


1. अद्वैतसिद्धिः – मधुसूदनसरस्वतीस्वामिनः, श्रीविद्यामुद्राक्षरशाला, कुम्भकोणम्
2. ईशादिदशोपनिषदः – चौखम्बा
3. सदौडपादीयकारिकाथर्ववेदीयमाण्डूक्योपनिषत् – आनन्दाश्रममुद्रणालयः, पुण्यपत्तनम्
4. सर्वदर्शनसङ्ग्रहः – श्रीमत्सायणमाधवाचार्यः, निर्णयसागरमुद्रणालयः, पुण्यपत्तनम्
5. सूतसंहिता – माधवाचार्यः, श्रीदक्षिणामूर्तिमठ प्रकशन, वाराणसी


[7] बृ.उ – ४.३.१०
[8] सर्वदर्शनसङ्ग्रहः – शाङ्करदर्शनम्
[9] सू.सं – ४.१०.५२
[10] छा.उ – ६.१.१
[11] मा.का – १.१७